# श्री विष्णु महिम्नः स्तोत्रं

श्री विष्णु महिम्नः स्तोत्रं

महिम्नस्ते पारं विधिहरफणींद्रप्रभृतयो
विदुर्नाद्याप्यज्ञश्चलमतिरहं नाथ नु कथं |
विजानीयामद्धा नळिननयनात्मीयवचसो
विशुद्ध्यै वक्ष्यामीषदपि तु तथापि स्वमतितः || 1 ||

यदाहुर्ब्रह्मैके पुरुषमितरे कर्म च परे-
-ऽपरे बुद्धं चान्ये शिवमपि च धातारमपरे |
तथा शक्तिं केचिद्गणपतिमुतार्कं च सुधियो
मतीनां वै भेदात्त्वमसि तदशेषं मम मतिः || 2 ||

शिवः पादांभस्ते शिरसि धृतवानादरयुतं
तथा शक्तिश्चासौ तव तनुजतेजोमयतनुः |
दिनेशं चैवामुं तव नयनमूचुस्तु निगमा-
-स्त्वदन्यः को ध्येयो जगति किल देवो वद विभो || 3 ||

क्वचिन्मत्स्यः कूर्मः क्वचिदपि वराहो नरहरिः
क्वचित् खर्वो रामो दशरथसुतो नंदतनयः |
क्वचिद्बुद्धः कल्की विहरसि कुभारापहृतये
स्वतंत्रोऽजो नित्यो विभुरपि तवाक्रीडनमिदं || 4 ||

हृताम्नायेनोक्तं स्तवनवरमाकर्ण्य विधिना
द्रुतं मात्स्यं धृत्वा वपुरजरशंखासुरमथो |
क्षयं नीत्वा मृत्योर्निगमगणमुद्धृत्य जलधे-
-रशेषं संगुप्तं जगदपि च वेदैकशरणं || 5 ||

निमज्जंतं वार्धौ नगवरमुपालोक्य सहसा
हितार्थं देवानां कमठवपुषाविश्य गहनं |
पयोराशिं पृष्ठे तमजित सलीलं धृतवतो
जगद्धातुस्तेऽभूत्किमु सुलभभाराय गिरिकः || 6 ||

हिरण्याक्षः क्षोणीमविशदसुरो नक्रनिलयं
समादायामर्त्यैः कमलजमुखैरंबरगतैः |
स्तुतेनानंतात्मन्नचिरमवभाति स्म विधृता
त्वया दंष्ट्राग्रेऽसाववनिरखिला कंदुक इव || 7 ||

हरिः क्वास्तीत्युक्ते दनुजपतिनाऽऽपूर्यनिखिलं
जगन्नादैः स्तंभान्नरहरिशरीरेण करजैः |
समुत्पत्याशूरस्यसुरवरमादारितवत-
-स्तव ख्याता भूमन् किमु जगति नो सर्वगतता || 8 ||

विलोक्याऽजं द्वार्गं कपटलघुकायं सुररिपु-
-र्निषिद्धोऽपि प्रादादसुरगुरुणात्मीयमखिलं |
प्रसन्नस्तद्भक्त्या त्यजसि किल नाद्यापि भवनं
बलेर्भक्ताधीन्यं तव विदितमेवामरपते || 9 ||

समाधावासक्तं नृपतितनयैर्वीक्ष्य पितरं
हतं बाणैः रोषाद्गुरुतरमुपादाय परशुं |
विना क्षत्रं विष्णो क्षितितलमशेषं कृतवसो-
-ऽसकृत् किं भूभारोद्धरणपटुता ते न विदिता || 10 ||

समाराध्योमेशं त्रिभुवनमिदं वासवमुखं
वशे चक्रे चक्रिन्नगणयदनिशं जगदिदं |
गतोऽसौ लंकेशस्त्वचिरमथ ते बाणविषयं
न केनाप्तं त्वत्तः फलमविनयस्यासुररिपो || 11 ||

क्वचिद्दिव्यं शौर्यं क्वचिदपि रणे कापुरुषता
क्वचिद्गीताज्ञानं क्वचिदपि परस्त्रीविहरणं |
क्वचिन्मृत्स्नाशित्वं क्वचिदपि च वैकुंठविभव-
-श्चरित्रं ते नूनं शरणद विमोहाय कुधियां || 12 ||

न हिंस्यादित्येव ध्रुवमवितथं वाक्यमबुधै-
-र्यथाग्नीषोमीयं पशुमिति तु विप्रैर्निगदितं |
तवैतन्नास्थानेऽसुरगणविमोहाय गदतः
समृद्धिर्नीचानां नयकर हि दुःखाय जगतः || 13 ||

विभागे वर्णानां निगमनिचये चावनितले
विलुप्ते संजातो द्विजवरगृहे शंभलपुरे |
समारुह्याश्वं त्वं लसदसिकरो म्लेच्छनिकरान्
निहंतास्युन्मत्तान् किल कलियुगांते युगपते || 14 ||

गभीरे कासारे जलचरवराकृष्टचरणो
रणेऽशक्तो मज्जन्नभयद जलेऽचिंतयदसौ |
यदा नागेंद्रस्त्वां सपदि पदपाशादपगतो
गतः स्वर्गं स्थानं भवति विपदां ते किमु जनः || 15 ||

सुतैः पृष्टो वेधाः प्रतिवचनदानेऽप्रभुरसा-
-वथात्मन्यात्मानं शरणमगमत्त्वां त्रिजगतां |
ततस्तेऽस्तातंका ययुरथ मुदं हंसवपुषा
त्वया ते सार्वज्ञं प्रथितममरेशेह किमु नो || 16 ||

समाविद्धो मातुर्वचनविशिखैराशु विपिनं
तपः कृत्वा गत्वा तव परम तोषाय परमं |
ध्रुवो लेभे दिव्यं पदमचलमल्पेऽपि वयसि
किमस्त्यस्मिन्लोके त्वयि वरद तुष्टे दुरधिगं || 17 ||

वृकाद्भीतस्तूर्णं स्वजनभयभित्त्वां पशुपति-
-र्भ्रमन्लोकान् सर्वान् शरणमुपयातेऽथ दनुजः |
स्वयं भस्मीभूतस्तव वचनभंग्युद्गतमतिः
रमेश हो माया तव दुरनुमेयाऽखिलजनैः |18 ||

हृतं दैत्यैर्दृष्ट्वाऽमृतघटमजय्यैस्तु नयतः
कटाक्षैः सम्मोहं युवतिपरवेषेण दितिजान् |
समग्रं पीयूषं सुभगसुरपूगायददतः
समस्यापि प्रायस्तव खलु हि भृत्येष्वभिरतिः || 19 ||

समाकृष्टा दुष्टैर्द्रुपदतनयाऽलब्धशरणा
सभायां सर्वात्मंस्तव चरणमुच्चैरुपगता |
समक्षं सर्वेषामभवदचिरं चीरनिचयं
स्मृतेस्ते साफल्यं नयनविषयं नो किमु सतां || 20 ||

वदंत्येके स्थानं तव वरद वैकुंठमपरे
गवां लोकं लोकं फणिनिलयपाताळमितरे |
तथान्ये क्षीरोदं हृदयनळिनं चापि तु सतां
न मन्ये तत् स्थानं त्वहमिह च यत्रासि न विभो || 21 ||

शिवोऽहं रुद्राणामहममरराजो दिविषदां
मुनीनां व्यासोऽहं सुरवर समुद्रोऽस्मि सरसां |
कुबेरो यक्षाणामिति तव वचो मंदमतये
न जाने तज्जातं जगति ननु यन्नासि भगवन् || 22 ||

शिरो नाको नेत्रे शशिदिनकरावंबरमुरो
दिशः श्रोत्रे वाणी निगमनिकरस्ते कटिरिला |
अकूपारो वस्तिश्चरणमपि पाताळमिति वै
स्वरूपं तेऽज्ञात्वा नृतनुमवजानंति कुधियः || 23 ||

शरीरं वैकुंठं हृदयनळिनं वाससदनं
मनोवृत्तिस्ताक्ष्यौ मतिरियमथो सागरसुता |
विहारस्तेऽवस्थात्रितयमसवः पार्षदगणो
न पश्यंस्त्यज्ञास्त्वमिह बहिरहो याति जनता || 24 ||

सुघोरं कांतारं विशति च तटाकं सुगहनं
तथोत्तुंगं शृंगं सपदि च समारोहति गिरेः |
प्रसूनार्थं चेतोऽंबुजममलमेकं त्वयि विभो
समर्प्याज्ञस्तूर्णं बत न च सुखं विंदति जनः || 25 ||

कृतैकांतावासा विगतनिखिलाशाः शमपराः
जितश्वासोच्छ्वासास्त्रुटितभवपाशाः सुयमिनः |
परं ज्योतिः पश्यंत्यनघमभिपश्यंतु मम तु
श्रियाश्लिष्टं भूयान्नयनविषयं ते किल वपुः || 26 ||

कदा गंगोत्तुंगाऽमलतरतरंगाच्च पुळिने
वसन्नाशापाशादखिलखलदाशादपगतः |
अये लक्ष्मीकांतांबुजनयन ताताऽमरपते
प्रसीदेत्याजल्पन्नमरवर नेष्यामि समयं || 27 ||

कदा शृंगैः स्फीते मुनिगणपरीते हिमनगे
द्रुमावीते शीते सुरमधुरगीते प्रतिवसन् |
क्वचिद्ध्यानासक्तो विषयसुविरक्तो भवहरं
स्मरंस्ते पादाब्जं जनिहर समेष्यामि विलयं || 28 ||

सुधापानं ज्ञानं न च विपुलदानं न निगमो
न यागो नो योगो न च निखिलभोगोपरमणं |
जपो नो नो तीर्थव्रतमिह न चोग्रं त्वयि तपो
विना भक्तिं तेऽलं भवभयविनाशाय मधुहन् || 29 ||

नमः सर्वेष्टाय श्रुतिशिखरदृष्टाय च नमो
नमोऽसंश्लिष्टाय त्रिभुवननिविष्टाय च नमः |
नमो विस्पष्टाय प्रणवपरिमृष्टाय च नमो
नमस्ते सर्वात्मन् पुनरपि पुनस्ते मम नमः || 30 ||

कणान् कश्चिद्वृष्टेर्गणननिपुणस्तूर्णमवने-
-स्तथाऽशेषान् पांसूनमित कलयेच्चापि तु जनः |
नभः पिंडीकुर्यादचिरमपिचेच्चर्मवदिदं
तथापीशासौ ते कलयितुमलं नाखिलगुणान् || 31 ||

क्व माहात्म्यं सीमोज्झितमविषयं वेदवचसां
विभो मेऽतो चेतः क्व च विविधतापाहतमिदं |
मयेदं यत्किंचिद्गदितमथ बाल्येन तु गुरो
गृहाणैतच्छुद्धार्पितमिह न हेयं हि महतां || 32 ||

इति हरिस्तवनं सुमनोहरं
परमहंसजनेन समीरितं |
सुगमसुंदरसारपदास्पदं
तदिदमस्तु हरेरनिशं मुदे || 33 ||

गदारथांगांबुजकंबुधारिणो
रमासमाश्लिष्टतनोस्तनोतु नः |
बिलेशयाधीशशरीरशायिनः
शिवस्तवोऽजस्रमयं परं हरेः || 34 ||

पठेदिमं यस्तु नरः परस्तवं
समाहितोऽघौघघनप्रभंजनं |
स विंदतेऽत्राखिल भोगसंपदो
महीयते विष्णुपदे ततो ध्रुवं || 35 ||

इति श्रीमत्परमहंसस्वामि ब्रह्मानंद विरचितं श्री विष्णु महिम्नः स्तोत्रं ||